॥ श्रीः ॥

शीघ्रबोधः ।

भाषाटीकासमेतः

ज्योतिर्वित्काशीनाथेन विरचितः

स च

भगीरथात्मजहरिप्रसादानां

पुस्तकालयस्याधिपतिना भगीरथजनुषा

व्रजवल्लभशर्मणा

मुंबय्यां "मुंबईवैभव" मुद्रणालयेंऽकयित्वा

प्रकाशितः ।

सन १९२० संवत १९७६.





अथ शीघ्रबोधविषयानुक्रमणिका ।



अनुक्रमणिका प्रकरणम् १.

॥ इति अनुक्रमणिका समाप्ता ॥

॥ श्रीः ॥

अथ शीघ्रबोधप्रारम्भः ।



प्रकरणम् १

भासयंतंजगद्भासानत्वाभास्वंतमव्ययम् ॥
क्रियतेकाशिनाथेनशीघ्रबोधायसंग्रहः ॥ १ ॥

टीका—मुझ काशिनाथ नामक आचार्य करके जिनकी आभासे यह जगत्‌रूप संसार प्रकाशित है व जो अविनाशी हैं ऐसे सूर्यको प्रणाम करके जल्दी बोध होनेके लिये शीघ्रबोध ग्रंथको संग्रह किया जाता है ॥ १ ॥

रोहिण्युत्तररेवत्योर्मूलंस्वातिमृगोमघा ॥
अनुराधाचहस्तश्चविवाहेमंगलप्रदाः ॥ २ ॥

टीका—रोहिणी, तीनों उत्तरा, रेवती, मूल, स्वाती, मृगशिर, मघा, अनुराधा और हस्त ये ग्यारह नक्षत्र विवाहमें मंगलके दाता हैं ॥ २ ॥ इति विवाहनक्षत्राणि ॥

माघेधनवतीकन्याफाल्गुनेसुभगाभवेत् ॥
वैशाखेचतथाज्येष्ठेपत्युरत्यंतवल्लभा ॥ ३ ॥

टीका—माघमासमें विवाह करै तो कन्या धनवती हो, फाल्गुनमें सौभाग्यवती हो, वैशाखमें तथा ज्येष्ठमें विवाह हो तो अपने पतिको अत्यंत प्यारी हो ॥ ३ ॥

आषाढेकुलवृद्धिःस्यादन्येमासाश्चवर्जिताः ॥
मार्गशीर्षमपीच्छंतिविवाहेकेपिकोविदाः ॥४॥

टीका—जो आषाढमासमें विवाह करे तो कुलकी वृद्धि हो और महीने विवाहमें वर्जित हैं; परंतु मार्गशीर्षकोभी कोई आचार्य विवाहमें शुभ कहते हैं ॥ ४ ॥

इति विवाहमासाः ।

अमावास्याचरिक्ताचवारवेलाचजन्मभम् ॥
गंडातंक्रूरवाराश्चवर्जनीयाः प्रयत्नतः ॥ ५ ॥

टीका—अमावास्या, रिक्तातिथि अर्थात् ४।९।१४, वार-

वेला जन्मका नक्षत्र, क्रूरवार (रवि, मंगल, शनि) और गडांत मूल ये विवाहमें यत्नपूर्वक वर्जे है ॥ ५ ॥

नंदाभद्राजयारिक्तापूर्णाश्चतिथयःक्रमात् ॥
वारत्रयंसमावर्त्यतिथयःप्रतिपन्मुखाः ॥ ६ ॥

टीका—नंदा, भद्रा, जया, रिक्ता व पूर्णा ये पांच नाम तिथिनके कहे हैं. तिनमें नदा १।६।११, भद्रा २।७।१२, जया ३।८।१३, रिक्ता ४।९।१४, पूर्णा ५।१०।१५॥ प्रति पदासे गनिये ॥ ६ ॥ इति तिथिनामानि ॥

तुर्योऽर्केसप्तमश्चंद्रेद्वितीयोभूमिनंदने ॥
चंद्रपुत्रेपंचमश्चदेवाचार्येतथाऽष्टमः ॥ ७ ॥

टीका—अब वारवेला कहते है रविवारको चार ४ याममें अर्धयाम, चद्रको ७, भौमको २, बुधको ५, गुरुवारको ८, यामार्ध दोष है ॥ ७ ॥

दैत्यपूज्येतृतीयश्चशनौषष्ठश्चनिंदित. ॥
प्रहरार्धेशुभेकार्येवारवेलाचकथ्यते ॥ ८ ॥

टीका—और शुक्रवारको ३, शनिवारको ६, इसप्रकारसे इन यामोंके अर्धयामोंमें वारवेला जानिये; ये शुभकार्येमें निंदित हैं इक्कीस कोठेके चक्रमें समझ लेना ॥ ८ ॥ इति वारवेला ॥

वारवेलाचक्रम्							
४	७	२	५	८	३	६	याम
३॥	३॥	३॥	३॥	३॥	३॥	३॥	घटी
र	चं	म	बु	गु	शु	श	वार

भद्राकर्कटयोगंचातिथ्यंतंयमघंटकम् ॥
दग्धातिथिंचभांतंचकुलिकंचविवर्जयेत् ॥ ९॥

टीका—भद्रा, कर्कटयोग, तिथिके अंतकी घडी २, यमघंटयोग, दग्धातिथि, नक्षत्रके अंतकी घडी ३ ॥ व कुलिकयोग इतने दोष विवाहमें वर्जित है ॥ ९ ॥

दशम्यांचतृतीयायांकृष्णपक्षपरे दले ॥
सप्तम्यांचचतुर्दश्यांविष्टिःपूर्वेदलेस्मृता ॥ १० ॥
एकादश्यांचतुर्थ्यांचशुक्लपक्षेपरेदले ॥
अष्टम्यांपूर्णिमायांचविष्टिःपूर्वदलेस्मृता ॥११॥

अथपूर्वदलभद्रातिथिपक्ष.			
कृष्णपक्ष.	३	१०	परार्धे.
कृष्णपक्ष.	७	१४	पूर्वार्धे.
शुक्लपक्ष.	४	११	परार्धे.
शुक्लपक्ष.	८	१५	पूर्वार्धे.

टीका—अत्र कृष्णपक्ष शुक्लपक्षकी कौनसी तिथियोंमें पूर्वदल अथवा परदलविषे भद्रा होती है सो चक्रविषे समझ लेना ॥ १० ॥ ११ ॥

मेषमकरवृषकर्कटस्वर्गे,
कन्यामिथुनतुलाधनुनागे ॥
कुंभमीनअलिकेसरिमृत्यौ,
विचरतिभद्रात्रिभुवनमध्ये ॥ १२ ॥

टीका—यह भद्रा स्वर्गलोक, मृत्युलोक व पाताललोक इन तीनों लोकोंविषे वास करती है. मेष, मकर, वृष व कर्क इनके चंद्रमामें भद्रा स्वर्गलोकमें जानिये. कन्या, मिथुन, तुला व धनुके चंद्रमामें पाताललोकमें और कुंभ, मीन, वृश्चिक तथा सिंहके चंद्रमामें भद्राका वास मृत्युलोकमें जानिये ॥ १२ ॥

स्वर्गेभद्राशुभंकार्यंपाताले च धनागमम् ॥
मृत्युलोकेयदाविष्टिःसर्वकार्यविनाशिनी ॥१३॥

टीका—जो स्वर्गलोकमें भद्रा हो तौ शुभकार्यको करै. पातालमें हो तौ द्रव्यलाभ हो और जो मृत्युलोकमें हो तौ सर्वकार्य विनाश करै ॥ १३ ॥

संमुखेमृत्युलोकस्थापातालेचह्यधोमुखी ॥
ऊर्ध्वस्थास्वर्गगाभद्रासंमुखेमरणप्रदा ॥ १४ ॥

टीका—जो मृत्युलोकमें भद्रा हो तो सम्मुख कहिये, पातालमें अधोमुख और स्वर्गमें ऊर्ध्वमुख. इनमें जो सन्मुख भद्रा हो तौ मृत्युकी दाता है ॥ १४

दिवाभद्रायदारात्रौरात्रिभद्रायदादिने ॥
तदाविष्टिकृतोदोषोनभवेत्सर्वसौख्यदा ॥१५॥

टीका—जो कृष्णपक्षमें सप्तमी चौदशीकी और शुक्लपक्षमें अष्टमी पौर्णिमाकी पूर्वदल भद्रा दिनसंज्ञक है सो रात्रिमें परै और शुक्लपक्षमें ४।११ कृष्णपक्षमें ३।१० की परदल भद्रा रात्रिसंज्ञक है सो दिनमें परै तौ भद्राका दोष नहीं है यह भद्रा सुखकी दाता है ॥ १५ ॥ इतिभद्रानिर्णयः ॥

मीनेचापेद्वितीयाचचतुर्थीवृषकुंभयोः ॥
मेषकर्कटयोः षष्ठीकन्यायुग्मेपुचाष्टमी ॥ १६ ॥
दशमीवृश्चिकेसिंहेद्वादशीमकरेतुले ॥
एतास्तुतिथयोदग्धाः शुभेकर्मणिवर्जिताः १७

टीका—मीन व धनके सूर्यमें द्वितीया २ वृषभ व कुंभके सूर्यमें चौथ ४, मेष व कर्कके सूर्यमें ६, कन्या व मिथुनके सूर्यमें ८, वृश्चिक व सिंहके सूर्यमें १०, और मकर व तुलाके रविमें १२, इन संक्रांतियोंमें इतनी तिथियां दग्धा जानिये. ये शुभकार्य विषे वर्जित करी हैं ॥ १६ ॥ १७ ॥ इति दग्धास्तिथयः ॥

मासांतेदिनमेकंतुतिथ्यंते घटिकाद्वयम् ॥
घटिकानांत्रयंभांतेविवाहेपरिवर्जयेत् ॥ १८ ॥

टीका—मासांत यानी संक्रांतिके अंतका एक दिन, तिथिके अंतकी दो घड़ी, नक्षत्रके अंतकी तीन घडी ये विवाहमें वर्जित हैं ॥ १८ ॥

मासांतेम्रियतेकन्यातिथ्यंतेस्यादपुत्रिणी ॥
नक्षत्रांतेचवैधव्यंविष्टौमृत्युर्द्वयोर्भवेत् ॥ १९ ॥

टीका—मासके अंतमें भांमरी[1] परे तो कन्याकी मृत्यु हो. तिथ्यंतमें अपुत्रिणी हो. नक्षत्रके अंतमें विधवा हो. भद्रामें कन्या वर दोनोंकी मृत्यु हो ॥ १९ ॥

सूर्ये च सप्तमीसोमेषष्ठीभौमेचपंचमी ॥
बुधे चतुर्थीदेवेज्येतृतीयाभृगुनंदने ॥ २० ॥
द्वितीयावर्जनीयाचप्रतिपच्चशनैश्चरे ॥
कुलिकाख्योहियोगोयंविवाहादौनशस्यते २१

टीका—अब कुलिक योग कहते हैं सो चक्रमें समझ लीजिये. चक्रमें लिखे हुए इन वारोंका इन तिथियोंमें कुलिकयोग होता है ॥२०॥२१॥

अथ कुलिकयोगतिथिचक्र.

र.	च	मं.	बु	गु	शु.	श.	वार.
७	६	५	४	३	२	१	तिथि.

॥ इति कुलिकयोगः ॥

अवर्गोगरुडोज्ञेयोविडालःस्यात्कवर्गकः ॥
चवर्गःसिंहनामास्याट्टवर्गः कुक्करःस्मृतः॥२२॥

---

१ भामरी फेरोंको कहते हैं.

सर्पाख्यःस्यात्तवर्गोपिपवर्गोमूषकःस्मृतः ॥
यवर्गोमृगनामास्यात्तथामेषःशवर्गकः ॥ २३ ॥

टीका–अवर्गादि अष्टौव्यापार जो विवाहादि विचारनेको कहते हैं. जिसके नामका जो अक्षर पहिला हो वही वर्ग कहिये. तिनमें अ, आ, ई, ए, आदि अवर्ग हैं, सो गरुडवर्ग. क, ख, ग, घ, ङ, ये बिलाववर्ग. च, छ, ज, झ, ञ, ये सिंहवर्ग. ट, ठ, ड, ढ, ण, ये श्वानवर्ग. त, थ, द, ध, न, ये सर्पवर्ग. प, फ, ब, भ, म, ये मूषकवर्ग. य, र, ल, व, ये मृगवर्ग. श, ष, स, ह, ये मेंढावर्ग कहते हैं ॥ २२ ॥ २३ ॥

स्ववर्गात्पंचमेशत्रुश्चतुर्थेमित्रसंज्ञकः ।
उदासीनस्तृतीयेचवर्गभेदास्त्रिधोच्यते ॥ २४ ॥

टीका–अपने वर्गसे पांचमें वर्ग वैरी जानिये. चौथेमें मित्र जानना और तीसरे वर्गमें उदासीनता है ॥ २४ ॥ इति अष्टकवर्गः ॥

अश्विनीमृगरेवत्योहस्तःपुष्यःपुनर्वसुः ॥
अनुराधाश्रुतिःस्वातीकथ्यंतेदेवतागणाः ॥२५॥

टीका—अश्विनी, मृग, रेवती, हस्त, पुष्य, पुनर्वसु, अनुराधा, श्रवण, स्वाती, ये देवतागण कहलाते हैं ॥ २५ ॥

तिस्रःपूर्वाश्चोत्तराश्च तिस्रोऽप्यार्द्रा च रोहिणी
भरणी च मनुष्याख्यो गणश्च कथितो बुधैः ॥२६॥

टीका—पूर्वा ३, उत्तरा ३, आर्द्रा, रोहिणी, भरणी, इनमें जन्म हो तो मनुष्यगण जानिये ॥ २६ ॥

कृत्तिकाचमघाश्लेषाविशाखाशततारका ॥
चित्राज्येष्ठाधनिष्ठाचमूलंरक्षोगणःस्मृतः ॥२७॥

टीका—कृत्तिका, मघा, आश्लेषा, विशाखा, शतभिषा, चित्रा, ज्येष्ठा, धनिष्ठा, और मूल, ये नक्षत्र राक्षसगण कहलाते हैं ॥ २७ ॥

स्वगणेपरमाप्रीतिर्मध्यमादेवमर्त्ययोः ।
मर्त्यराक्षसयोर्मृत्युःकलहोदेवरक्षसोः ॥ २८ ॥

टीका—जो स्त्रीपुरुष एकही गण हों तो अधिक प्रीति हो. देव मनुष्य हों तो मध्यम प्रीति हो. मनुष्य व राक्षसगण हों तो मृत्यु हो. और देव तथा राक्षसगण हों तो कलह हो ॥ २८ ॥

षष्ठेस्त्रीपुंसयोर्वैरंमृत्युःस्यादष्टमेध्रुवम् ॥
द्विर्द्वादशेचदारिद्र्यंनवमेपंचमेकलिः ॥ २९ ॥

टीका—स्त्रीकी राशिसे पुरुषकी राशि ६ हो तौ वैर जानिये और पुरुषसे स्त्रीकी आठवीं राशि आवे तौ मृत्यु हो. स्त्रीसे आठवें पुरुष हो तौ शुभ है और २।१२ हो तौ दरिद्रता हो व ९।५ हो तो कलह हो ॥ २९ ॥ इति ।

मीनालिकर्कटाविप्राःक्षत्रीमेषोहरिर्धनुः ॥
शूद्रायुग्मंतुलाकुंभौवैश्याःकन्यावृषोमृगः ॥३०॥

टीका—मीन, वृश्चिक व कर्क ये राशि ब्राह्मणवर्ण हैं; मेष, सिंह व धन ये क्षत्रियवर्ण हैं; मिथुन, तुला व कुंभ ये शूद्रवर्ण हैं और कन्या, वृषभ व मकर ये वैश्यवर्ण हैं ॥३०॥

नोत्तमामुद्वहेत्कन्यां ब्राह्मणीं च विशेषतः ॥
म्रियते हीनवर्णश्च ब्रह्मणारक्षितोयदि ॥ ३१ ॥

विप्रवर्णेचयानारी शूद्रवर्णे च यः पतिः ॥
ध्रुवंभवतिवैधव्यं शक्रस्य दुहितायदि ॥ ३२ ॥

टीका—जो कन्या उत्तमवर्ण हो व पुरुष हीनवर्ण हो तो पुरुषकी निश्चय मृत्यु हो इससे उत्तमवर्णवाली कन्यासे विवाह वर्जित है. तिसमें ब्राह्मणी विशेष करके मना है. और जो ब्राह्मणवर्णवाली कन्यासे शूद्रवर्ण वरका विवाह हो तौ जो इन्द्रकी कन्या हो तौभी वह निश्चयकरके विधवा हो ॥ २१ ॥ २२ ॥

पौष्णादिकंषट्कमुशंतिपूर्वमार्द्रादिकंद्वादशमध्यभागम् ॥ पौरंदराद्यंनवकंभचक्रंपरंचभागंगणकाविदग्धाः ॥ २३ ॥

टीका—रेवती नक्षत्र आदि देके षट् ६ नक्षत्रोंको पूर्वभाग कहते हैं. आर्द्रा आदि देके द्वादश नक्षत्रोंको मध्यभाग कहते हैं और ज्येष्ठा आदि देके नव नक्षत्रोंको परभाग कहते हैं ॥ २३ ॥

पूर्वभागेपतिःश्रेष्ठोमध्यभागेचकन्यका ॥ परभागेचनक्षत्रेद्वयोःप्रीतिर्महीयसी ॥ २४ ॥

टीका—पूर्वभागी पति हो और मध्यभागी स्त्री हो तौ पति श्रेष्ठ कहिये. जो मध्यभागी स्त्री हो और परभागी पुरुष

हो तो स्त्री श्रेष्ठ कहिये और स्त्री पुरुष दोनों परभागी हों तो आपसमें अधिक प्रीति हो ॥ ३४ ॥

सिंहं विना वशाः सर्वे द्विपदानां चतुष्पदाः ॥
भक्ष्या जलचरास्तेषां भयस्थाने सरीसृपः॥३५॥

टीका—सिंहके विना दूसरे सब चतुष्पद (चौपाये) द्विपद (मनुष्योंके) के वशमें हैं और इन (मनुष्यों) के जलचर भक्ष्य हैं तथा सर्प विछुआदि भयदायक हैं ॥ ३५ ॥

मकरस्यपूर्वभागोमेषसिंहधनुर्वृषाः ॥
चतुष्पदाः कीटसंज्ञः कर्कः सर्पश्चवृश्चिकः॥ ३६ ॥
तुलाचमिथुनंकन्यापूर्वार्द्धधनुषश्चयत् ॥
द्विपदास्तुगार्द्धंतुकुंभमीनौजलाश्रितौ ॥ ३७ ॥

टीका—मकरराशिका पहिला अर्धभाग यानी उत्तराषाढाके तीन चरण व श्रवणके डेढ़ चरणपर्यंत और मेष, सिंह, आधि धन व वृषभ ये चतुष्पद (चौपायों) की संज्ञा जानिये और कर्कराशिकी कीट संज्ञा है; वृश्चिककी सर्प संज्ञा है और तुला, मिथुन, कन्या व धनका पहिला आधा

भाग ये द्विपद जानिये तथा कुंभ व मीन जलचर ॥ ३६ ॥ ३७ ॥ इति०

अथ नक्षत्रयोनिश्चक्रं च

अश्विनीवारुणश्चाश्वो रेवतीभरणी गजः ॥
पुष्यकृत्तिकयोश्छागो नागश्चरोहिणीमृगः ॥३८॥
आर्द्रामूलमपिश्वाचमूषकःफाल्गुनीमघा ॥
मार्जारोदितिराश्लेषागोजातिरुत्तराद्वयम् ॥ ३९॥
महिषःस्वातिहस्तौचमृगोज्येष्ठाऽनुराधिका ॥
व्याघ्रश्चित्राविशाखाच श्रुत्यापाढौचमर्कटः ॥४०॥
वसुभाद्रपदौसिंहोनकुलोऽभिजिद्विश्वयोः ॥
योनयःकथिता भानांवैरमैत्रीविचार्यताम् ॥ ४१ ॥

टीका—इन चारों श्लोकोंका अर्थ योनिचक्रमें समझ लेना. चौदह योनिकोष्टकके सन्मुख सबके अपने कोष्टक लिखे हैं ॥३८॥३९॥४०॥४१॥ इति योनिविचारनिर्णयः ॥

अश्वि	रे	पु	रो	भा	पू.फा	पु	उ.फा	स्वा	ज्ये	चि	पू.पा.	ध	ऽभि
श	भ	कृ	मृ	मू	म	ऽश्ले	उ.भा	ह	ऽनु	वि	श्र	पू	उ.पा
घोडा	ग	छा	ना	श्वा	मूष	बि	गो	भे	हि	व्या	वंदर	सिं	नकु

अथ योनिवैरम्.

गोव्याघ्रं गजसिंहमश्वमहिषं श्वैणं चवभ्रूरगं
वैरं वानरमेषकं चसुमहत्तद्वद्विडालोंदुरोः ॥
लोकानांव्यवहारतोनिगदितंज्ञात्वाप्रयत्नादि-
दं दंपत्योर्नृपभृत्ययोरपि सदा वर्ज्यं शुभस्या-
र्थिभिः ॥ ४२ ॥

टीका—गाई व भेडियांका, हाथी व सिंहका, घोडा व भैंसका, कुत्ता व हिरणका नकुल व सर्पका, वानर व मेंढ़कका और बिलाव व मूषकका वैर कहा है ऐसा वैरभाव जानके यत्नपूर्वक स्त्रीपुरुष और स्वामीसेवकका वैर शुभार्थियों करके वर्जने योग्य हैं ॥ ४२ ॥ इति योनिवैरम् ॥

मरणंपितृमात्रोश्चसंश्राह्यंनवपंचकम् ॥
वरस्यपंचमेकन्याकन्यायानवमेवरः ॥ ४३ ॥

एतत्त्रिकोणकंग्राह्यंपुत्रपौत्रसुखावहं ॥
षडष्टकेभवेन्मृत्युर्यत्नंतस्यविचारयेत् ॥ ४४ ॥

टीका—जो पुरुषकी राशिसे कन्याकी राशि ९ हो तो तिसकरके पिताकी मृत्यु हो और जो कन्याकी राशिसे पुरुषकी राशि ५ हो तो तिनकी माताकी मृत्यु हो. वरकी राशिसे ५ पांचवीं राशि कन्याकी हो व कन्याकी राशिसे ९ नववीं वरकी राशि हो तौ यह त्रिकोण शुभ है व यह पुत्र पौत्रके सुखका दाता है और जो ६ छवे, ८ आठवें होय तो मृत्यु होय. तिससे षडष्टकका यत्नसे विचार करना ॥ ४३ ॥ ४४ ॥ इति राशिमेलनम् ॥

वरस्यभास्करबलंकन्यायाश्चगुरोर्बलम् ॥
द्वयोश्चंद्रबलंग्राह्यंविवाहोनान्यथाभवेत् ॥ ४५ ॥

टीका—वरको सूर्यबल चाहिये, कन्याको बृहस्पतिका बल चाहिये और वरकन्याको चंद्रबल चाहिये ॥ ४५ ॥

अष्टमेचचतुर्थेचद्वादशेचदिवाकरे ॥
विवाहितोवरोमृत्युंप्राप्नोत्यत्रनसंशयः ॥ ४६ ॥

टीका-जो वरको सूर्य ४।८।१२ होनेपर विवाह करै तौ मृत्यु होवे ॥ ४६ ॥

जन्मन्यथद्वितीयेवापंचमेसप्तमेऽपिवा ॥
नवमेचदिवानाथेपूजयापाणिपीडनम् ॥ ४७ ॥
एकादशेतृतीयेवापष्ठेवादशमेऽपिवा ॥
वरस्यशुभदोनित्यंविवाहेदिननायकः ॥ ४८ ॥

टीका-जो वरकी राशिसे सूर्य १।२।५।७।९ हो तौ इस परिहारवाक्यसे सूर्यकी पूजा दानजपादिक करके विवाह शुभ है और जो ११।३।६।१० रवि होय तौ विवाह शुभ कहिये ॥ ४७ ॥ ४८ ॥ इति रविबलम् ॥

अष्टमेद्वादशेवापिचतुर्थेवाबृहस्पतौ ।
पूजातत्रनकर्तव्याविवाहेप्राणनाशकः ॥ ४९ ॥

टीका-जो कन्याको बृहस्पति ४।८।१२ हो तौ पूजा करनेपरभी विवाह करनेसे प्राणका घात करै ॥ ४९ ॥

षष्ठे जन्मनि देवेज्ये तृतीये दशमेपि वा ॥
भूरिपूजापूजितःस्यात्कन्यायाः शुभकारकः ५०

टीका–जो कन्याका बृहस्पति ६।११।३।१० होवे तौ पूजा दानादिक देके विवाह करे तौ शुभ हो ॥ ५० ॥

एकादशेद्वितीयेवापंचमेसप्तमेपिवा ॥
नवमेत्रसुराचार्येकन्यायाःशुभकारकः ॥ ५१

टीका–जो कन्याका बृहस्पति ११।२।५।७।९। होवे विशेषकरके शुभ है ॥ ५१ ॥ इति गुरोर्बलम् ॥

अष्टाब्दिका भवेद्गौरी नववर्षा च रोहिणी ॥
दशवर्षाभवेत्कन्याअतऊर्ध्वंरजस्वला ॥ ५२ ॥

टीका–अष्टवर्षमें कन्याको गौरी संज्ञा जानिये; नववर्षमें रोहिणी, दशवर्षमें कन्यासंज्ञा जानिये और इसके उपरान्त रजस्वला कहते है ॥ ५२ ॥

गौरी गुरोर्बले देया रोहिणी भास्करस्य च ॥
कन्या चंद्रबले देया सर्वदोषविवर्जिता ॥ ५३ ॥

टीका–गौरीको बृहस्पतिके बलमें देवे, रोहिणीको सूर्यके बलमें देवे और कन्याको चंद्रबलमें देवे ॥ ५३ ॥

आद्येचंद्रःश्रियं कुर्यान्मनस्तोपं द्वितीयके ॥
तृतीयेधनसंतोषंचतुर्थेकलहागमम् ॥ ५४ ॥
पंचमेज्ञानवृद्धिं च षष्ठेसंपत्तिमुत्तमाम् ॥
सप्तमेराजसन्मानं मरणं चाष्टमेतथा ॥ ५५ ॥ नवमेधर्मलाभंचदशमे मानसेप्सितं ॥ एकादशेसर्वलाभं द्वादशेहानिमेवच ॥ ५६ ॥

१	लक्ष्मीप्राप्ति
२	मनस्ताप
३	धनसंतोष
४	कलहागम
५	ज्ञानवृद्धि
६	संपत्ति
७	राजसन्मान
८	मृत्युभय
९	धनलाभ
१०	इच्छितला
११	सर्वलाभ
१२	हानि

टीका-इधर कन्या और वरका चंद्रचक्र कहा है. सो इस चक्रपरसे समझ लीजिये ॥ ५४ ॥ ५५ ॥ ५६ ॥

॥ अथान्यमते विशेषः ॥

गुर्विंद्विनबलागौरीगुर्विंदुबलरोहिणी ॥
रवींदुबलजाकन्यामौढालग्नबलास्मृता ॥ ५७ ॥

टीका-गौरीको बृहस्पति, चंद्रमा व सूर्य इन तीनोंका बल विचारिये, तो शुभ है. रोहिणीके गुरु और चंद्रमाका बल

विचारिये. कन्याको रवि और चंद्रमाका बल चाहिये व मौढाको लग्नबलही बहुत है ॥ ५७ ॥

जीवोजीवप्रदाताच द्रव्यदाताच चंद्रमाः ॥
तेजोदाताभवेत्सूर्यो भूमिदातामहीसुतः ॥ ५८ ॥
जीवहीनामृताकन्या सूर्यहीनोमृतोवरः ॥
चंद्रेहीनेगतालक्ष्मीःस्थानहानिःकुंजविना ५९

टीका—बृहस्पति जीवनके दाता हैं, चंद्रमा धनके दाता हैं, सूर्य तेजके दाता हैं और मंगल भूमिदाता हैं. बृहस्पति हीन हो तो कन्याकी मृत्यु हो, जो सूर्य हीन हो तो वरकी मृत्यु हो, चंद्रमा हीन हो तो लक्ष्मी क्षीण हो व मंगल हीन हो तो स्थानहानि करै ॥ ५८ ॥ ५९ ॥

गौरींददन्नागलोके वैकुंठे रोहिणींददत् ॥
कन्यांददन्मृत्युलोकेरौरवंतुरजस्वलाम् ॥ ६० ॥

टीका—गौरीदान करै तो पाताललोकमें सुखकी प्राप्ति होय; रोहिणीदान करै तो वैकुंठवास पावै; जो कन्यादान करै तो मृत्युलोकमें सुखकी प्राप्ति होय और जो रजस्वला-दान करै तो रौरवमें पड़े ॥ ६० ॥

संप्राप्तेकादशे वर्षे कन्या या न विवाहिता ।
मासेमासेपिताभ्रातातस्याःपिबतिशोणितम् ॥६१॥

टीका—जो ग्यारहवें वर्षमें कन्याका विवाह न करे तो महीना महीना प्रति जो रजस्वला होय उसका रुधिर पिता और ज्येष्ठ भ्राता मानों पान करता है ॥ ६१ ॥

द्वादशैकादशेवर्षेतस्याः शुद्धिर्नजायते ॥
पूजाभिःशकुनैर्वापितस्यालग्नंप्रदापयेत् ॥ ६२ ॥

टीका—जो ग्यारह बारह वर्षकी कन्या होय तो बृहस्पतिका बल देखै और लग्न विचारके पूजा दान करके विवाह करे ॥ ६२ ॥

माताचैव पिताचैव ज्येष्ठभ्राता तथैवच ॥
त्रयस्थनरकं यांति दृष्ट्वाकन्यां रजस्वलाम् ॥६३॥

टीका—जो माता, पिता, ज्येष्ठ भ्राता, ये तीनों रजस्वला कन्याको देखैं तो नरकके अधिकारी होते हैं ॥ ६३ ॥

अथ नाडीविचारः ।

आदिमध्यांतकंवापिअंतमध्यादिमानिच । अश्विन्यादिक्रमेणैव रेवत्यंतं सुसंलिखेत् ॥ ६४ ॥ ऊर्ध्वगा वेदरेखाः स्युस्तिर्यग्रेखा दशस्मृताः ॥ सर्पाकारं लिखेद्धानां नाडीचक्रंवदेद्बुधः॥ ॥ ६५ ॥ नाडीदोषस्तुविप्राणां वर्णदोषश्च क्षत्रिये ॥ गणदोषश्चवैश्येषु योनिदोषस्तु पादजान् ॥ ६६ ॥

आदिमध्यांतनाडी चक्र		
आदि.	मध्य.	अंत्य.
अ.	भ.	कृ.
आ.	मृ.	रो.
पु.	पु.	आ.
उ.	पू.	म.
ह.	चि.	स्वा.
ज्ये.	अ.	वि.
मू.	पू.	उ.
श.	ध.	श्र.
पू.	उ.	रे.

टीका—आदि, मध्य, अंत्य, अंत्य, मध्य, आदि इस प्रकार अश्विनीसे रेवतीपर्यंत गनिये. चार रेखा खडी और दश रेखा तिर्छी इसी प्रकार सत्ताईस कोठोंको पंडितजन नाडीचक्र कहते हैं. नाडीका दोष ब्राह्मणको, वर्णका दोष क्षत्रियको, गणका दोष वैश्यको और योनिका दोष शूद्रको विशेषकरके जानिये ॥ ६४ ॥ ६५ ॥ ६६ ॥

एकनाडीस्थनक्षत्रे दंपत्योर्मरणं ध्रुवम् ॥
सेवायांचभवेद्धानिर्विवाहेचाशुभं भवेत् ॥ ६७ ॥

टीका—जो वर कन्या दोनों एक नाडीके नक्षत्रों विषे जन्मे हों तो दोनोंकी मृत्यु हो अर्थात् विवाहमें अशुभ होवे और मालिक व नौकरमें एक नाडी हो तो हानि होवे ॥ ६७ ॥


आद्यानाडीवरंहंतिमध्यनाडीचकन्यकां ॥
अंत्यनाडीद्वयोर्मृत्युर्नाडीदोषंत्यजेद्बुधः ॥६८॥

टीका—जो आदि नाडीका दोष हो तो वरको अरिष्ट करे; मध्यका दोष हो तो कन्याको अनिष्ट है और अंत्य नाडीका वेध लगे तो दोनोंकी मृत्यु होय ॥ ६८ ॥

एकनक्षत्रजातानां नाडीदोषो न विद्यते ॥
अन्यर्क्षपतिवेधेषु विवाहोवर्जितः सदा ॥ ६९ ॥

टीका—जो वर कन्याका एकही नक्षत्रमें जन्म होय तो एक नाडीका दोष न मानिये, और दूसरे नक्षत्रोंमें जन्म होय तो विवाह सर्वथा वर्जित है ॥ ६९ ॥

पंचोर्ध्वाः स्थापयेद्रेखाः पंचतिर्यङ्मुखास्तथा ॥
द्वयोश्चकोणयोर्द्वेद्वेचक्रंपंचशलाककम् ।
ईशानेकृत्तिकादेयाक्रमादन्यानिभानिच ॥
ग्रहास्तेषुप्रदातव्यायेचयत्रप्रतिष्ठिताः ॥ ७१ ॥
लग्नस्यनिकटेयाचगताभवतिपूर्णिमा ॥
तन्नक्षत्रस्थितश्चंद्रोदातव्योगणकोत्तमैः ॥ ७२ ॥



टीका—पंच रेखा ऊर्ध्व पांच तिरछी और दो २ रेखा कोनोंमें करै, तिसको पंचशलाका चक्र कहते हैं ॥ ७० ॥ ईशान दिशाआदि लेके कृत्तिका आदि नक्षत्र क्रमसे धरिये ॥ ७१ ॥ जो लग्नके निकट पूनो हो तो तिस नक्षत्रपर पंडितोंको चन्द्रमा धरना योग्य है ॥ ७२ ॥

लत्तापातोयुतिर्वेधोजामित्रंबुधपंचकम् ॥
एकार्गलोपग्रहौचक्रांतिसाम्यंनिगद्यते ॥७३॥

दग्धातिथिश्चविज्ञेया दशदोषा महाबलाः ॥
एतान्दोषान्परित्यज्यलग्नंसंशोधयेद्बुधः ॥७४॥

टीका–अब दोष कहते हैं. लत्ता १, पात २, युति ३, वेध ४, जामित्र ५, बुधपंचक ६, एकार्गल ७, उपग्रह ८, क्रांतिसाम्य ९, और दग्धा तिथि १०, ये दश दोष महाबलवान् हैं इनसे बचायके लग्न साधिये ॥७३॥७४॥

नक्षत्रंद्वादशंभानुस्तृतीयंलत्तयाकुजः ॥
षष्ठं जीवोष्टमंमंदोहंति दक्षिणतः सदा ॥७५॥

वामेन सप्तमश्चांद्रिर्नवमंसिंहिकासुतः ॥
हंति भंपंचमंशुक्रो द्वाविंशं पूर्णचंद्रमाः ॥७६॥

टीका–जिस नक्षत्रका लग्न हो तिसी नक्षत्रसे दाहिने इस प्रकार सूर्य, भौम, गुरु व शनि ये चार ग्रह लात मारते हैं

१२ नक्षत्रमें रवि, ३ भौम, ६ गुरु ८ शनि लात मारते हैं और वामभाग होके सातवें नक्षत्रको बुध लात मारता है नवमें ९ राहु, पांचवेंमें ५ शुक्र और बाईसवेंमें २२ नक्षत्रको चंद्रमा लात मारते हैं ॥ ७५ ॥ ७६ ॥

रवेर्लत्ताहरेद्वित्तंकुजस्यकुरुतेमृतिं ॥
बृहस्पतेर्बंधुनाशंशनेःकुर्यात्कुलक्षयम् ॥ ७७ ॥
बुधस्यकुरुतेत्रासंलत्ताराहोर्विनाशयेत् ॥
शुक्रस्यदुःखदानित्यंत्रासदातुकलानिधेः ॥७८॥

टीका–सूर्यकी लात लगे तो संपत्ति हरे; भौमकी लात लगे तो मृत्यु करै; बृहस्पतिकी लगे तो बंधुका नाश करैं; शनिकी लात लगे तो कुलका क्षय करै; बुधकी लात त्रास करै; राहुकी लातसे नाश हो; शुक्रकी लात लगे तो दुःखदायक है, और चंद्रकी लात त्रास करे ॥ ७७ ॥ ७८ ॥

सूर्ययुक्ताच्च नक्षत्रादेष पातो विधीयते ॥
मघाश्लेषाचचित्राचसानुराधाचरेवती ॥ ७९

श्रवणोपिचषट्कोऽयं पातदोषो निगद्यते ॥
अश्विनीमवधिंकृत्वागणयेऋभावधि ॥ ८० ॥

टीका—जिस नक्षत्रमें सूर्य हो उसी नक्षत्रमें फिर आन परै तो पातदोष कहिये. मघा, आश्लेषा, चित्रा, अनुराधा, रेवती, श्रवण ये छह नक्षत्र पातके हैं इन नक्षत्रोंके सूर्यके संयोगसे छह भांतिके पात कहते हैं प्रथम सूर्यके नक्षत्रसे सताईस रेखा खैंचिये. नक्षत्रपात कहते हैं पीछे करिये. फिर अश्विनी आदि देके फेरेके नक्षत्रकों गनिये. जो पीछे नक्षत्रमें गिनती पूरी होय तो पातदोष लगै ॥ ७९ ॥ ८० ॥ इति पातचक्रम्

पावकःपवमानश्च विकारःकलहोपरः ॥
मृत्युःक्षयश्चविज्ञेयंपातषट्कस्य लक्षणम् ॥८१॥

टीका—अब छह भांतिके पातोंके नाम व लक्षण कहते हैं. पावक १, पवमान २, विकार ३, कलह, ४ मृत्यु ५, व क्षय ६, ये छहों पात नामानुसार फल करते हैं ॥ ८१ ॥

पातेन पतितो ब्रह्मा पातेन पतितो हरिः ॥
पातेनपतितःशंभुस्तस्मात्पातंविवर्जयेत् ॥८२॥

टीका—पातसे ब्रह्मा पतित भये, विष्णु पतित भये शिव पतित भये, इससे विवाहमें पातदोष विशेषकरके करना ॥ ८२ ॥

चित्रांगतोपातविचित्रदेशेमैत्रोमघामालवके निषिद्धः ॥ पौष्णश्रुतीचोत्तरदेशजातः त्ववर्ज्यश्च भुजंगपातः ॥ ८३ ॥

टीका—चित्रानक्षत्रका पात विचित्रदेशमें वर्जित है. अनुराधाका व मघाका पात मालवदेशमें निषिद्ध है. रेवती श्रवण इनका पात उत्तरमें निषिद्ध है और आश्लेषाका पात सर्वदेशमें वर्जित है ॥ ८३ ॥ इतिपातः ॥

यत्रर्क्षे तु भवेच्चंद्रो ग्रहस्तत्रयदा भवेत् ॥ युतिदोषस्तदाज्ञेयोविनाशुक्रंशुभाशुभम् ॥ ८४ ॥

टीका—जिस नक्षत्रमें चंद्रमा हो उसी नक्षत्रमें और ग्रह होय तो युतिदोष कहते हैं; परंतु शुक्रविना शुक्रसंयुक्त शुभ, अन्यतम अशुभ है ॥ ८४ ॥

रविणासंयुतो हानिं भौमेननिधनं शशी ॥
करोतिमूलनाशंचराहुकेतुशनैश्चरैः ॥ ८५ ॥

टीका—जो चंद्रमा सूर्यके साथ हो तो हानि करै, भौमके साथ हो तो मृत्यु करै, और राहु, केतु, शनैश्चरके साथ हो तो मूलनाश करै ॥ ८५ ॥

वर्गोत्तमगतश्चंद्रः स्वोच्चं वा मित्रराशिगः ॥
युतिदोषश्चनभवेद्दंपत्योःश्रेयसीसदा ॥ ८६ ॥

टीका—जो चंद्रमा षड्वर्गविषे श्रेष्ठवर्गोंमें हो अथवा उच्चका हो वा मित्रराशिका हो तो युतिदोषका नाश करै वधूवर दोनों सुखी रहै ॥ ८६ ॥ इति युतिदोषः ॥

एकरेखास्थितिर्वेधो दिननाथादिभिर्ग्रहैः ॥
विवाहेतत्रमासंतुनजीवतिकदाचन ॥ ८७ ॥

टीका—जिस नक्षत्रका लग्न होय उसी नक्षत्ररेखापर सामने सूर्यआदि कोई ग्रह होय तो उसका वेध कहिये. उस पर विवाह होवे तो एक महीनाके अंतमें मृत्यु करै ॥ ८७ ॥-

अश्विनीपूर्वफाल्गुन्याभरणीचानुराधया॥
अभिजिच्चापिरोहिण्याकृत्तिकाचविशाखया
भृगुश्चोत्तरषाढेनपूर्वाषाढातथार्द्रऽऽया ॥
पुनर्वसुश्चमूलेनतथापुष्यश्चज्येष्ठया ॥ ८९ ॥
धनिष्ठयातथाऽऽश्लेषामघापिश्रवणेनच ॥
रेवत्युत्तरफाल्गुन्यायस्तेनोत्तरभाद्रपात् ॥ ९०
स्वात्याशतभिषाविद्धाचित्रयापूर्वभाद्रपात् ॥
विद्धान्येतानिवर्ज्याणिविवाहेभानिकोविदैः॥९१

टीका—अश्विनी और पूर्वाफाल्गुनीकी एक रेखा है, भरणी व अनुराधाकी एक रेखा है ऐसे जो दोनों और एक रेखा होय तो वेध कहिये ऐसे अठाईस नक्षत्रोंको जानिये ये वेध पंचशलाका चक्रमें देख लेना ८८—९१

रविवेधेचवैधव्यंकुजवेधेकुलक्षयम् ॥
बुधवेधेभवेद्वंध्याप्रव्रज्यागुरुवेधतः ॥ ९२ ॥

अपुत्राशुक्रवेधेचसौरेचंद्रेचदुःखिता ॥
परपूरुषरताराहोःकेतोःस्वच्छंदचारिणी ॥९३॥

टीका—जो सूर्यका वेध लगे तौ कन्या विधवा होती है । मंगलका वेध लगे तौ कुलका क्षय होवेगा । बुधका वेध लगे तो वंध्या होवेगी गुरुका वेध लगे तौ संन्यासी, शुक्रका वेध लगे तौ पुत्रहीन, शनिचंद्रमाका वेध लगे तौ दुःखी, राहुका वेध लगे तो परपुरुषगामिनी और केतुका वेध हो तौ स्वछंदचारिणी होती है ॥ ९२ ॥ ९३ ॥

शनिराहुकुजादित्यायदाजन्मर्क्षसंस्थिताः ॥
विवाहिताचयाकन्यासाकन्याविधवाभवेत् ॥

टीका—शनि, राहु, भौम व सूर्य इनमेसे कोई ग्रह विवाहसमय जन्मनक्षत्रपर होय तौ कन्या विधवा हो जायगी ॥९४॥

चतुर्दशंचनक्षत्रं जामित्रं लग्नभात्स्मृतं ॥
शुभयुक्तंतदिच्छंतिपापयुक्तंचवर्जयेत् ॥ ९५ ॥

टीका—जो लग्नके नक्षत्रपर चौदहवें नक्षत्रपर पापग्रह हो

तौ जामित्रदोष कहिये और जो सौम्यग्रह होय तौ शुभ है ॥ ९५ ॥

चंद्रश्चाद्रिर्भृगुर्जीवोजामित्रेशुभकारकाः ॥
स्वर्भानुर्भानुमंदाराजामित्रेनशुभप्रदाः ॥ ९६ ॥

टीका—जो चंद्रमा, बुध, बृहस्पति और शुक्र ये ग्रह जन्मके नक्षत्रसे जामित्रमें होय तौ शुभ कहिये और जो राहु, शनि, सूर्य तथा भौम ये जामित्रमें होंय तौ अशुभ है ॥ ९६ ॥

चंद्राद्वालग्नतोवापिग्रहवर्ज्याश्चसप्तमे ॥
तत्रस्थिताग्रहानूनंव्याधिवैधव्यकारकाः ॥९७॥

टीका—चंद्रमासे वा लग्नके राशिसे सातवें कोई ग्रह हो तौ वे व्याधि और वैधव्य करैं ॥ ९७ ॥ इति जामित्रदोष ॥

धार्यातिथिर्मासदशाष्टवेदाः संक्रांतितोयातदि-नैश्चयोज्याः ॥ ग्रहैर्विभक्तायादिपंचशेषोरो गस्तथाऽग्निर्नृपचौरमृत्युः ॥ ९८ ॥

टीका—अब पंचक कहते हैं. तिथि कहिये १९, मास कहिये १२, दश १०, अष्ट ८, वेद ४, संक्रांतिके जो दिन गये होंय तिनको युक्त करके नव ९ का भाग दीजे जो पांच शेष बचैं तो पंचक जानिये. ऐसेही पांचों अंक विचारिके रोगपंचक १९ में, अग्निपंचक बारह १२ में, राजपंचक दश १० में, चौर पंचक ८ में और मृत्युपंचक ४ में ॥ ९८ ॥

यद्यर्कवारे किलरोगपंचकं सोमेचराज्यंक्षितिजे चवह्निः ॥ सौरौच मृत्युर्धिपणेच चौरो विवाहकाले परिवर्जनीयाः ॥ ९९ ॥

टीका—रविवारको जो रोगपंचक लगै, सोमको राजपंचक लगै, मंगलको अग्निपंचक, शनैश्चरको मृत्युपंचक, और भृगुवारको चौरपंचक ये विवाहमें वर्जित है ॥ ९९ ॥

रोगंचोरंत्यजेद्रात्रौदिवाराज्याग्निपंचकम् ।
उभयोःसंध्ययोर्मृत्युरन्यकालेननिंदिताः ॥१००॥

टीका—रोग और चोरपंचक रात्रिको अशुभ हैं, और राज्य व अग्निपंचक दिनमें वर्जित हैं, दोनोंके संधिमें मृत्युपंचक निंदित है और समयमें वर्जित नहीं है ॥ १०० ॥ इति पंचकदोषः ॥

सूर्यभात्पंचमे विद्यान्नक्षत्रे शूलमष्टमे ॥
चतुर्दशे शनैः पातःकेतुरष्टादशे तथा ॥ १ ॥
ऊनविंशे भवेदुल्का निर्घातश्चद्विविंशके ॥
त्रयोविंशतिकेकंपःपंचविंशे तु वज्रकः ॥ २ ॥

टीका—सूर्यके नक्षत्रसे पांचवें कोई ग्रह होय तो विद्युद्दोष लगै, ८ वें शूलदोष लगै, चौदह १४ पर शनिपातदोष लगे; अठारह १८ पर केतुदोष लगै १९ पर उल्का २२ पर निर्घात, २३ पर कंप, और २५ पर वज्रदोष लगै ॥ १०१ ॥ १०२ ॥ इति विद्युदादियोगाः ॥

पुत्रनाशकरीविद्युत् पत्युःशूलो विनाशकः ॥
शनेःपातोवंशघातीकेतुर्देवरनाशकः ॥ ३ ॥

द्रव्यनाशकरीचोल्कानिर्घातोवंधुनाशकः ॥
कंपःकंपयतेनित्यंवज्रेस्त्रीव्यभिचारिणी ॥ ४ ॥

टीका—विद्युदोष लगै तौ पुत्रका नाश करै, शूल दोष पतिका नाश करै, शनिका पात वंशघात करै, केतुदोष देवरका नाश करै, उल्कादोष द्रव्यका नाश करै, निर्घात भ्राताका नाश करै, कंप नित्यही कंपावै, वज्रदोष लगै तो स्त्री व्यभिचारिणी होय ॥ ३ ॥ ४ ॥ इति विद्युदादिदोषफलानि ॥

योगांकेविषमेचैकोदेयोष्टाविंशतिःसमे ॥
अर्द्धंकृत्वाश्विनीपूर्वामर्कंभंमूर्ध्निदीयते ॥ ५ ॥

टीका—जो योगके अंक विषम होंय तौ एक जोरिये और सम अंक होंय तौ अठाईस जोरिये सो आधा करि अश्विनीसे पूर्व जो अंक होय सो, माथेपर लिखिये ॥ ५ ॥

विष्कंभेचाश्विनीदेयाप्रीतौस्वातिर्निगद्यते ॥
सौभाग्येचविशाखा स्यादायुष्मान् भरणी

मृ	
रो	आ
कृ	पु
म	पु
भ	ऽश्ले
रे	म.
व	पू.
पु	उ
श.	ह
ध	चि
भ	स्वा
अ	वि
उ	ऽनु
पू.	ज्ये
मृ	

युतः ॥ ६ ॥ शोभनेकृत्तिका देयाअनुराधाचगंडके ॥ रोहिणीचसुकर्माख्येधृतौ ज्येष्ठा प्रकीर्तिता ॥ ७ ॥ गंडेमूलंमृगःशूलेवृद्धौचार्द्रानिगद्यते ॥ पूर्वाषाढा ध्रुवे प्रोक्ताव्याघा तेचपुनर्वसुः ॥ ८ ॥ हर्षणेचोत्तराषाढा वज्रपुष्यः प्रकीर्तितः ॥ अभिजिच्चतथासिद्धावाश्लेषाव्यतिपातके ॥ ९ ॥ वरीयसि श्रुतिर्देयापरिघेचमघातथा ॥ शिवेधनिष्ठादातव्यासिद्धौपूर्वाचफाल्गुनी ॥ ११० ॥ साध्येशतभिषादेयाशुभेचोत्तरफाल्गुनी ॥ पूर्वाभाद्रपदाशुक्लेहस्तेब्रह्मा [illegible] ॥ ११ ॥ उत्तराभाद्रपचेंद्रेचित्रादे [illegible]धृतौ ॥ सूर्याचंद्रमसोर्योगेभवेदेकार्गलं

तदा ॥ १२ ॥ त्रयोदशतिरोरेखाएकोर्ध्वामुनर्थे भिस्मृता ॥ योगांकेशासनक्षत्रेज्ञेयमेकार्गलं बुधैः ॥ १३ ॥

टीका—एकार्गलचक्रकी त्रयोदश रेखा तिरछी खैंचै; एकरेखा खडी खैंचै; योगके अंक और जो नक्षत्र कहे हैं वे सूर्यचंद्रका योग एक रेखासे होवे एकार्गलदोष कहिये विष्कंभयोगको और अश्विनीको कहा है ऐसेही क्रमसे चक्रमें समझ लीजिये ॥ ११३ ॥ इत्येकार्गलनि० ॥

ऊर्ध्वास्तिस्रस्तिरास्तिस्रोमध्येमीनं लिखेद्बुधः ॥
सूर्याचंद्रमसोर्दृष्टौक्रांतिसाम्यंनिगद्यते ॥ १४ ॥
मीनःकन्यकयायुक्तोमेषः सिंहेनसंगतः ॥
मकरेणवृषेक्रांतिश्चापोपि मिथुनेनच ॥ १५ ॥
कर्केणवृश्चिकोविद्धोवेधश्चतुलकुंभयोः ।
क्रांतिसाम्येकृतोद्वाहेनजीवतिकदाचन ॥ १६ ॥

टीका—तीन रेखा ऊर्ध्व और तीन तिरछी खेंच कर ऊर्ध्व मध्यकी रेखापर मीन, कन्या और तीरछी मध्यमपर मिथुन, धन, लिखके क्रमसे सब लग्नको धरिके चक्र बनाइये उसमें एक रेखापर चंद्र सूर्य परैं तौ क्रांतिसाम्य दोष कहिये. मीनसे कन्याको वेध जानिये. मेष सिंहको मकर वृषभको मिथुन धनको कर्क वृश्चिकको तुला कुंभको इन राशिनको परस्पर विद्ध समझकर त्यागकर दीजिये. यह विवाहादिक अनेक कार्यको वर्ज्य है ॥ १४ ॥ १५ ॥ १६ ॥

क्रांतिसाम्येचकन्यायायदिपाणिग्रहोभवेत् ॥
कन्यावैधव्यतांयातिईशस्यदुहितायदि ॥१७॥

टीका—जो क्रांतिसाम्यमें विवाह होवे तौ कन्या विधवा होय, ईश यानी महादेव तिनकी पुत्री होय तौभी इस दोषपर विवाह होनेसे विधवा होजायगी. ॥ १७ ॥ इति क्रांतिसाम्यम् ॥

मर्मवेधः कंटकश्च शल्यं छिद्रं चतुर्थकम् ॥
एतद्वेधचतुष्कं तु परित्याज्यं प्रयत्नतः ॥११८॥

टीका—अब चार दोष कहते हैं. मर्मवेध १, कंटक २, शल्य ३, व छिद्र ४ इन दोषोंको यतन कर बचाइये, यह गणकजनोंकी आज्ञा है ॥ ११८ ॥

लग्नेपापे मर्मवेधः कंटको नवपंचके ॥
चतुर्थे दशमे शल्यं छिद्रं भवति सप्तमे ॥११९॥

टीका—लग्नमें पापग्रह हो तो मर्मवेध, चौथे और दशम स्थानमें पापग्रह हो तो शल्यदोष, सप्तमस्थानमें पापग्रह हो तो छिद्रदोष, और नवम व पंचमस्थानमें पापग्रह हो तो कंटकदोष होता है ॥ ११९ ॥

मरणं मर्मवेधे स्यात्कंटके च कुलक्षयः ॥
शल्येचनृपतेर्भीतिःपुत्रनाशश्चछिद्रके ॥१२०॥

टीका—जो मर्मवेधमें विवाह होवे तो मृत्यु, कंटकमें होवे तो कुटुंबका क्षय, शल्यदोषमें होवे तो राजाका भय और छिद्रमें हो तो पुत्रका नाश जानिये ॥ १२० ॥ इति वेध-चतुष्टपदोषः ॥

जन्ममासेजन्मभेच नचजन्मदिनेपिच ।
ज्येष्ठे नज्येष्ठगर्भस्य विवाहंकारयेत्क्वचित्॥२१॥

टीका—जन्मका मास, जन्मका नक्षत्र, जन्मका दिन और प्रथमगर्भको ज्येष्ठ मास ये विवाह विषे वर्जित करे हैं, परंतु जो गर्भकेविषे कहे सोही ज्येष्ठत्व अनेक मतांतरसे प्राधान्य है ॥ २१ ॥

नकन्यावरयोर्ज्येष्ठे ज्येष्ठयोः पाणिपीडनम् ।
द्वयोरेकतरेज्येष्ठेनज्येष्ठो दोषमावहेत् ॥ २२ ॥

टीका—जो वर तथा कन्या दोनों प्रथमगर्भके हों तौ ज्येष्ठमासमें विवाह नहीं करना और कन्या वा वर इन्होंमें एक ज्येष्ठ हो तौ ज्येष्ठमें विवाह कीजे. दोष नहीं है. कारण तीन ज्येष्ठ नहीं चाहिये ॥ २३ ॥

सिंहेगुरौगतेकार्यो नविवाहःकदाचन ॥
मेषस्थितेदिवानाथेसिंहेज्येचशुभप्रदः ॥ २३ ॥

टीका—बृहस्पति सिंहस्थ होवे तब विवाह नहीं करना. केवल मेषके सूर्यमें करिये तौ सिंहका गुरुभी शुभ फलदायक है ॥ २३ ॥

रवौसार्धत्रयोभागाःपंचचंद्रेगुरौत्रयः ॥
द्वेद्वेशुक्रेंदुपुत्रेस्यादिश्वाभागप्रदायकाः ॥२४॥
प्रत्येकंसार्धभागाश्चमंदमंगलराहुषु ॥
ग्रहाबलयुताविश्वास्त्रयच्छंतिनदुर्बलाः ॥२५॥

टीका—सूर्यके ३॥ भाग, चंद्रमा ५ भाग, गुरुके ३ भाग, और शुक्र व बुधके २।२ भाग इन भागोंके विश्वा शुभ हैं ॥ २४ ॥ शनि, मंगल, राहु और केतु इन ग्रहोंको डेढ डेढ भाग १॥ डेढ विश्वा भागपूर्वक जबलों बलिष्ठ रहै, तबलौं ये शुभ हैं, जब वे क्षीण होयँगे तब निर्बल हैं ॥ २५ ॥ इतिविशोपकफलम् ॥

केंद्रेसप्तमहीनेचद्वित्रिकोणेशुभाःशुभाः ॥
धनेशुभप्रदश्चंद्रःपापाःषष्ठेचशोभनाः ॥ २६ ॥
तृतीयेकादशेसर्वेसौम्याःपापाःशुभप्रदाः ॥
तेसर्वेसप्तमस्थानेमृत्युदावरकन्ययोः ॥ २७ ॥

टीका—केंद्रस्थान यानी लग्न, चतुर्थ, सप्तम, व दशम, जो इन स्थानविषे शुभ ग्रह हों तो श्रेष्ठ हैं. अकेले सातवें

स्थानमें शुभग्रह अशुभ हैं. शुक्र, बुध, बृहस्पति और शुक्ल-दशमीसे कृष्णपक्षकी ५ पर्यंतका चंद्रमा श्रेष्ठ बली होता है. और सूर्य, राहु, शुक्ल २ से दशमी १० पर्यंतका चंद्रमा ये चार ग्रह जानिये. भौम, शनि, केतु कृष्णपंचमीसे ३० तक चंद्रमा ये पापग्रह हैं. लग्नसे २ स्थानको चंद्रमा शुभ है. पापग्रह ६ स्थानमें शुभ हैं ॥ २६ ॥ ३ । ११ स्थानोंमें सर्व ग्रह शुभ हैं और वे सौम्य और क्रूर (पापग्रह) ७ स्थानमें होंय तो वर कन्याको मृत्यु देनेवाले हैं ॥ २७ ॥ इति फलदा ग्रहाः ॥

शनिःसूर्यश्चलग्नेऽस्ते चंद्रोलग्नेऽष्टमेरिपौ ॥
कुजेलग्नेऽष्टमेचास्तेशुक्रोद्यूनेऽष्टमेरिपौ ॥ २८ ॥

गुरुर्मृत्यौसैंहिकेयो लग्नेतुर्येचसप्तमे ॥
बुधेऽष्टमेचजामित्रेविवाहः प्राणनाशकः ॥२९॥

क्रूरयोरंतरंलग्नंचंद्रंचपरिवर्जयेत् ॥
वरंहंतिध्रुवंलग्नंशीतरश्मिश्चकन्यकाम् ॥ ३० ॥

टीका—शनि व सूर्य जो लग्नमें .. हों, चंद्रमा

१।६।८, भौम १।८।७। शुक्र ७।८।६, बृहस्पति ८ राहु १।७। ४, और बुध ८।७ ये ग्रह इतने स्थानोंमें विवाहविषे प्राणोंके नाश करनेवाले हैं. और पापग्रहोंके मध्य चंद्रमा अथवा लग्न होवे तौ दोनों वर्जनीय हैं, क्योंकि पापग्रहयुक्त लग्न वरको और चंद्रमा-कन्याको शीघ्रही मारता है ॥ २८ ॥ २९ ॥ १३० ॥ इति शुभाशुभग्रहनिर्णयप्रकरणम् ॥

तुलाचमिथुनंकन्यापूर्वार्धोधनुषोवृषः ॥
एतेलग्नाःशुभानित्यामध्यमाश्चापरेस्मृताः ।३१।

टीका—तुला, मिथुन, कन्या, वृष तथा धनुका पूर्वार्ध इतने लग्न शुभ हैं. शेष लग्न मध्यम हैं ॥ ३१ ॥

लत्तामालवकेदेशेपातश्चकुरुजांगले ॥
एकार्गलंचकाश्मीरे वेधं सर्वत्रवर्जयेत् ॥ ३२॥

टीका—लत्तादोष मालवदेशमें वर्जनीय है; पातदोष कुरुजांगल देशमें निषिद्ध है; एकार्गलदोष काश्मीर देशमें मना है और वेधदोष सर्व देशमें वर्जित है ॥ ३२ ॥

मेषेनवांशामेषाद्यावृषेचमकरादिकाः ॥
मिथुनेचतुलाद्याःस्युःकर्कटेकर्कटादिकाः॥२३॥

मेषाद्यौचधनुःसिंहौगोकन्यामकरादिकौ ॥
तुलाद्यौयुग्मकुंभौचकर्काद्यौमीनवृश्चिकौ॥२४॥

गोतुलायुग्मकन्यानांनवांशाःशुभदाःस्मृताः॥
धनुषःप्रथमोभागोविवाहेऽन्येचमध्यमाः॥२५॥

टीका—मेष आदि बारह राशियोंके नवांशक कहते हैं. लग्नके नवम भागको नवांशक कहते हैं. लग्न १ नक्षत्र २ नवांशक भोग्य करते हैं सो मेष, सिंह, धन इन तीनोंके पहिले नवांश मेषसे नवपर्यंत गनिये. वृष, कन्या, मकर, इन तीनके नवांश मकर आदि लेके कन्यापर्यंत मानिये. मिथुन, तुला, कुंभ इन तीनोंके नवांश तुला आदि देके मिथुन पर्यंत और कर्क, वृश्चिक, मीन इन तीनके नवांश कर्क आदि मीन पर्यंत गनिये. सो चक्रमें समझ लीजे. वृष, तुला, मिथुन, कन्या इनके नवांश शुभ हैं. और धनका पहिला शुभ, शेष

अशुभ मिश्रित है. और नवांश जो हैं सो विवाहमें मध्यम हैं ॥ ३३ ॥ ३४ ॥ ३५ ॥

अथ मेषादिराशीनां नवांशचक्रम् ।

१ मे	२ वृ	३ मि	४ क	५ सिं	६ क	७ तु	८ वृ	९ ध	१० म	११ कुं	१२ मी
मि.	मी.	ध.	कं	मि.	मी.	ध.	क.	मि.	मी.	ध.	कं.
क.	मे.	म.	तु.	क	मे	म.	तु	क.	मे	म	तु
सिं.	वृ.	कुं.	वृ.	सिं.	वृ.	कु.	वृ.	सिं.	वृ.	कु.	वृ.
क.	मि.	मी.	ध.	क.	मि.	मी.	ध.	कं.	मि.	मी.	ध.
तु	क.	मे.	म.	तु.	क.	मे.	म.	तु	क.	मे	म.
वृ.	सिं.	वृ.	कु.	वृ.	सिं.	वृ	कु.	वृ.	सिं.	वृ.	कु.
ध.	क.	मि.	मी.	ध.	क.	मि.	मी.	ध.	कं.	मि.	मी
१	२	३	४	५	६	७	८	९	१०	११	१२

अंशस्यपतिरंशेचतन्मित्रंवाशुभोपिवा ॥
पश्यतेवाशुभोंशेयःसर्वदोपाश्चनिष्फलाः ॥३६॥

टीका—नवांशका स्वामी जो है सो अथवा स्वामीका मित्र और शुभग्रह नवांशमें होय अथवा इनकी दृष्टि लग्नपर हो तो सर्व दोषनको निष्फल करैं ॥ ३६ ॥

शुक्लाष्टमींसमारभ्यफाल्गुनस्यदिनाष्टकम् ॥
पूर्णिमामवधिंकृत्वात्याज्यंहोलाष्टकंबुधैः॥३७॥
शुतुद्र्यांचविपाशायामैरावत्यांत्रिपुष्करे ॥
होलाष्टकंविवाहादौत्याज्यमन्यत्र शोभनम् ३८

टीका---फाल्गुनके शुक्लपक्षकी अष्टमीसे पूर्णिमा तक आठ दिन होलाष्टक वर्जनीय कहते हैं ॥ ३७ ॥ सो शुतुद्री नदीका तीर, विपाशानदीका तीर व इरावती नदीका तीर इन देशोंमें और त्रिपुष्करक्षेत्रमें विवाहादिक उत्तम कार्यविषे वर्जित है. अन्यत्र शुभ है ॥ ३८ ॥ इतिहोलाष्टकम् ।

दिनेसदांधावृषमेषसिंहारात्रौचकन्यामिथुनं कुलीरः ॥ मृगस्तुलालिर्बधिरोपराह्णेसंध्यासु कुब्जाघटधन्विमीनाः ॥ ३९ ॥

टीका-वृष, मेष, सिंह ये दिनमें अंधलग्न हैं. कन्या, मिथुन, कर्क ये रात्रिमें अंध; मकर, तुला, वृश्चिक ये अपराह्णमें बहरे. धन, कुंभ, मीन ये संध्यामें कुबरे हैं ॥ ३९ ॥

दिवांधोवरहंताचरात्र्यंधोधननाशकः ।
दुःखदोवधिरोलग्नःकुब्जोवंशविनाशकः ॥१४०॥

टीका—दिनके अंधे लग्नमें पाणिग्रहण होवे तो वरकी हानि होती है. रात्रिके अंधे लग्नमें हो तो धननाश है. बहरे लग्नमें पाणिग्रहण होय तो दुःखदायक है और कुबरे लग्नमें विवाह होय तो वंशनाश होता है ॥ १४० ॥

यत्रैकादशश्चंद्रोद्वितीयोवातृतीयकः ॥
गोधूलिकःसविज्ञेयःशेषाधूलिमुखाःस्मृताः१४१

टीका—जो ग्यारहवें स्थानमें चंद्रमा हो अथवा दूसरे तिसरे स्थानोंमें हो सो उत्तम गोधूलिक है और दूसरे गोधूलिक मुख कहते हैं ॥ १४१ ॥

कुलिकः क्रांतिसाम्यं च लग्ने पष्ठाष्टमे शशी ॥
तदागोधूलिकस्त्याज्यःपंचदोपैश्चदूपितः ॥

टीका—कुलिकयोग, क्रांतिसाम्य और लग्नमें छठे और आठवें चंद्रमा हो तौ गोधूलिक लग्नमें विवाह नहीं करना; क्योंकि लग्न इन पांच दोषोंसे दूषित होता है ॥ ४२ ॥

यदानास्तंगतोभानुर्गोधूल्यापूरितंनभः ॥
सर्वमंगलकार्येषुगोधूलिश्चप्रशस्यते ॥ ४३ ॥

टीका—जबलग सूर्य अस्त न होय और गायनकी खुरनकी धूर आकाशमें पूरित होरही होय तौ यह गोधूलिक मुहूर्त सकल कार्यविषे उत्तम मंगलकी दाता है ॥ ४३ ॥

अष्टमेजीवभौमौचबुधोवाभार्गवोऽष्टमे ॥
लग्नेषष्ठाष्टमेचंद्रस्तदागोधूलिनाशकः ॥ १४४ ॥

टीका—जो लग्नमें आठवें स्थानमें गुरु भौम, बुध, व शुक्र ये ग्रह हों अथवा लग्नमें १ वा छठवें आठवें ६।८ चंद्रमा होय तौ वह गोधूलिनाशक दोष है. उस मुहूर्तमें सर्व कार्य वर्जित है ॥ १४४ ॥ इति गोधूलिकः ॥

लग्नादेकादशे सर्वे लग्नपुष्टिकरा ग्रहाः ॥
तृतीये चाष्टमे सूर्यः सूर्यपुत्रश्च शोभनः॥४५॥
चंद्रो धनेतृतीयेच कुजःषष्ठे तृतीयके ॥
बुधेज्यौ नवषड्द्वित्रिचतुःपंचदशे स्थितौ॥४६॥
शुक्रो द्वित्रिचतुःपंचधर्मकर्मतनुस्थितः ॥
राहुर्दशाष्टषट्पंचत्रिनवद्वादशे शुभः ॥ ४७॥

टीका—लग्नसे ग्यारह स्थानमें सर्व ग्रह शुभ हैं. और सूर्य ३, शनि ८ ॥ ४५ ॥ चंद्रमा २।३, भौम ३।६ बुध व बृहस्पति ९।६।२।३।४।५।१० इन स्थानोंमें, शुक्र २।३।४।५-।९।१०।१ इन स्थानोंमें शुभ है, और राहु व केतु १०।८-।६।५।३।९।१२ इतने स्थानोंमें शुभ फलदायक हैं॥ ४६ ॥ ॥ ४७ ॥ इति रव्यादयः पुष्टिकरा ग्रहाः ॥

छायापादैरसोपेतैरेकविंशशतं भजेत् ॥
लब्धांकेघटिकाज्ञेयाःशेषांके च पलाःस्मृताः॥४८॥

टीका—अब दिन नापनेको कहते हैं. अपनी छाया दीलकी अपने पांवसे नापिये. जितने पांव छाया होवे उसीमें

और ६ मिलावै. फिर एकसौ एकईस १२१ को तिनसे भाग दीजै. जो भाग पाइये सो घटी दिन जानना. चढता होय तौ चढता दिन जानना और उतरता होय तौ बाकीदिन रहा जानना. भाग हरे पीछे शेष रहेगा वह साठ गुने करके फिर १२१ से भाग कर अंकोंपर फैलाकर पल कर लीजे. सो पल जानिये ॥ ४८ ॥ इति घटिकापलानां ज्ञानम् ॥

पूर्वापाढानुराधाच ज्येष्ठाश्लेषाचरेवती ॥
विशाखाचयदामूर्ध्नितदास्यादष्टमोदयः ॥४९॥
सूर्यभान्मौलिभं गण्यं सप्तहीनंच शेषकं ॥
द्विगुणंचद्विहीनंच गतारात्रिःस्फुटाभवेत् ५०
मस्तकेमृगशीर्षंच मूलेचनवमोदयः ॥
अन्यदृक्षं यदा मूर्ध्नि तदास्यादष्टमोदयः ॥५१॥

टीका—अब रात्रिगत निर्णय कहते हैं—पूर्वापाढा, अनुराधा, ज्येष्ठा, आश्लेषा, रेवती, विशाखा इन नक्षत्रोंमेंसे कोई नक्षत्र माथेपर होय तो आठवें नक्षत्रपर उदय जानिये ॥४९॥

और जिस नक्षत्रका सूर्य होय तासों जो नक्षत्र शिरपर होय ताको गनि लीजे और सातका भाग दीजे. जो बचै सो द्विगुण करके उनमें द्वय घटाइये. सो रात्रि गत वा भोग्य जानिये ॥ १५० ॥ मृगशिर वा मूल मायेपर होय तौ नवम नक्षत्रको उदय जानिये और जो अन्य नक्षत्र माथेपर होय तौ आठवें नक्षत्रको उदय जानिये ॥ ५१ ॥ इति रात्रिज्ञानम्.

किंकुर्वंतिग्रहाःसर्वे यस्य केंद्रे बृहस्पतिः ॥
मत्तमातंगयूथानां शतंहंतिचकेसरी ॥ ५२ ॥

टीका—जिसके १।४।७।१० इन केंद्रस्थानमें बृहस्पति अकेले होय तौ और सकल ग्रह क्या कर सकते हैं ? जैसे अकेला सिंह सकडों हाथियोंका समूह नाश करता है ऐसे सो और ग्रहजनित सब अरिष्टनको नाश करे ॥ ५२ ॥

शुक्रोदशसहस्राणि बुधोदशशतानिच ॥
लक्षमेकंतुदोपाणां गुरुर्लग्नेव्यपोहति ॥ ५३ ॥

टीका—जो लग्नमें शुक्र हो तौ दशहजार दोषोंको हनै बुध हजार और गुरु लक्ष दोषोंको हनै ॥ ५३ ॥

सर्पाकारंलिखेच्चक्रं विवाहेचत्रिनाडिकम् ॥
अश्विनीप्रमुखंभंचदत्त्वासाम्यंविचारयेत॥५४॥
एकनाडिस्थनक्षत्रेदंपत्योर्मरणंध्रुवं ॥
सेवायांचभवेद्धानिर्विवाहेत्वशुभंभवेत् ॥५५॥

टीका—सर्पका आकार लिखकर त्रिनाडी करके अश्विनी प्रमुख ३ नक्षत्र एक नाडिनमें राखिये. ऐसे ९ ठिकाने मुखसों लेकर पूंछतक २७ सत्ताईस नक्षत्र राखिये ॥ ५४ ॥ एक नाडीपै विवाह लग्नको नक्षत्र आवै तौ अशुभ है. सेवामें हानि होय ॥ ५५ ॥



परिघार्धंव्यतीपातंवैधृतिंसकलंत्यजेत् ॥
विष्कंभेघटिकाःपंचशूले सप्तप्रकीर्तिताः॥५६॥
षड्गंडेचातिगंडेचनवव्याघातवज्रयोः ॥
एतेतुनवयोगाश्चवर्ज्यालग्नेसदाबुधैः ॥ ५७ ॥

टीका—जो नवयोग निषिद्ध तिनकी घडी पंडित जनोंने वर्जित किया है सो ऐसी कि—परिघ घटी ३० व्यतीपात और वैधृति ये संपूर्ण त्याग करें. विष्कंभकी घटी ५, शूलकी ७ त्यागिये ॥ ५६ ॥ गंड तथा अतिगंडकी ६, व्याघातकी ९ और वज्रकी ९ घटी शुभकार्यमें वर्जित हैं. ॥ ५७ ॥

व्यतीपाते भवेन्मृत्युर्गंडांते मरणं ध्रुवं ॥
अग्निदग्धो भवेद्वज्रे रुजश्चैवापिगंडके ॥ ५८॥
वैधव्यंवैधृतौचैवविष्कंभेकामचारिणी ॥
वीर्यहीनातिगंडेच व्याघातेमृतवत्सका ॥
परिघेचभवेद्दासीमद्यमांसरतासदा ॥ ५९ ॥

टीका—व्यतीपातमें और गंडांतमें विवाह करे तो मृत्यु हो जावे वज्रमें आगसे जल जाय, गंडमें रोग होवे ॥ ५८ ॥ वैधृतिमें वैधव्य, विष्कंभमें कामातुर, अतिगंडमें धातुक्षय, व्याघातमें मृतवत्सा यानी पुत्र नहीं जीवे और परिघमें यह कन्या पराई दासी होकर मांसमदिरादिक सेवन करे ॥५९॥ इति निषिद्धयोगाः ॥

पट्टाकारंलिखेच्चक्रमष्टकोणसमन्वितं ॥
यस्मिन्नृक्षेभवेत्सूर्यस्तदाद्यंमध्यगत्रयं ॥ ६० ॥

त्रयस्त्रयश्चसर्वत्रततःपूर्वादितोलिखेत् ॥
नक्षत्रत्रितयेमध्ये पक्षद्वयविनाशनम् ॥ ६१ ॥

पूर्वस्थानेभवेल्लक्ष्मीर्धनधान्यसमागमः ॥
अग्निकोणेभवेन्मृत्युर्नारीकुलविनाशिनी॥६२॥

दक्षिणेदुर्भगानारीदारिद्र्यंमृत्युमाप्नुयात् ॥
नैर्ऋत्ये पुत्रलाभश्च सुखंसौभाग्यमेवच ॥६३॥

पश्चिमेविधवाकन्यावायव्येव्यभिचारिणी ॥
उत्तरेधनधान्यानिऐशानेसुखसंपदौ ॥ ६४ ॥

मांगल्यंसर्वकार्येषुपट्टचक्रंविचारयेत् ॥
गर्गाचार्येणसंप्रोक्तंसर्वसिद्धिप्रदायकम् ॥ ६५॥

टीका—सूर्यके नक्षत्रसे दिनके नक्षत्रलौं गनिये. पुनः पट्टाकारचक्रके मध्य कोठामें ३ धरिये. ऐसे क्रमसे



दिशाओंमें ३ तीन नक्षत्र आठों दिशानमें धरिये. जिसदिशामें दिनका नक्षत्र परे उसको फल कहिये. मध्यमें होय तौ उभयकुलका नाश होय. पूर्वमें होय तो लक्ष्मी धनधान्य होय. अग्निमें मृत्यु, वा कुलविनाशिनी स्त्री, दक्षिणमें दुर्भगा स्त्री, दारिद्र्य, मृत्यु, नैर्ऋत्यमें पुत्रलाभ, सौभाग्य, सुख; पश्चिममें वैधव्य होय; वायव्यमें व्यभिचारिणी; उत्तरमें धन धान्य सुख और ईशान्यमें सुख संपदा ॥ १६५ ॥ इति श्रीकाशीनाथभट्टाचार्यकृते शीघ्रबोधे विवाहप्रकरणं समाप्तम् ॥ १ ॥

शीघ्रबोधद्वितीयप्रकरणम् ।

द्विरागमनमुहूर्तः

धातृयुग्मंहयोमैत्रं श्रुतियुग्मं करत्रयम् ॥
पुनर्वसुद्वयं पूषामूलं चाप्युत्तरात्रयं ॥ १ ॥
विषमेवत्सरेमासेमार्गेमेषेचफाल्गुने ॥
मकरेमिथुनेमीनेलग्नेकन्यातुलाधनुः ॥ २ ॥
भौमार्किवर्जितावारा गृह्यंतेचद्विरागमे ॥
षष्ठीरिक्ता द्वादशीच अमावास्याचवर्जिताः॥३॥

टीका–रोहिणी, मृग, अश्वि. अनु. श्र. ध. ह. चि. स्वा. पु. पु रे. मू. उत्तरात्रय इतने नक्षत्र द्विरागमनको श्रेष्ठ हैं. विवाहसे विषम वर्ष श्रेष्ठ है. अगहन, फाल्गुन वैशाख ये मास श्रेष्ठ हैं म मि. क तु. ध ये लग्न श्रेष्ठ हैं और मंगल व शनिवार, षष्ठी, रिक्ता, द्वादशी, अमावास्या ये तिथि वर्जित है ॥ १ २ ॥ ३ ॥

अथ द्विरागमनाद्युक्तनक्षत्रादिचक्रम्.

रो.	मृ	ऽश्वि	ऽनु	श्र.	ध	ह	चि.	स्वा.	नक्षत्र
पुन	पु	रे	मू.	उत्त	उषा	उभा.	०	०	
१	३	५	७	९	११	१३	१५	१७	वर्षे
मार्गशीर्ष			फाल्गुन			वैशाख			मास
मि	क	तु	ध.	म	मी.	०	०	०	लग्न
र	च	बु.	गु	शु	०	०	०	०	वार
१	१	३	५	७	८	१०	११	१२	तिथि

आर्द्रात्रयंभाद्रयुग्मं मृगःपूपाश्रुतिःकरः ॥
मूलत्रयंगुरौसूर्येभौमेरिक्तांविनातिथिः ॥ ४॥
आद्येद्व्येत्रयेमासेलग्नेकन्याझषेस्थिरे ॥
चापे पुंसवनं कुर्यात्सीमंतं चाष्टमेतथा ॥ ५ ॥
शुभेत्रिकोणेकेंद्रस्थेपापेषष्ठेत्रिलाभके ॥
पुत्रकामःस्त्रियं गच्छेन्नरो युग्मासु रात्रिषु ॥६॥
पुनर्वसुद्व्येहस्तत्रयेमैत्रद्व्येमृगे ॥
मूलोत्तरा धनिष्ठाःस्युर्द्वादशैकादशेदिने ॥ ७ ॥
अन्यत्रापिशुभेभौमेवारेबुधशशांकयोः ॥
भानोर्गुरोःस्थिरेलग्ने बालनामकृतंशुभं ॥ ८ ॥

मैत्रत्रयेहरिद्वंद्वेविधिद्वन्द्वे दितिद्वये ॥
स्वातीहस्तोत्तरापाढापूपार्यमद्वयेषुच ॥ ९ ॥
सिंहत्रयेघटेलग्नेमासयोस्त्रिचतुर्थयोः ॥
यात्रातिथौचनिष्कास्यःशिशुर्नैवार्किभौमयोः ॥

टीका—आर्द्रा, पु. पु. पू. भा उ. भा. मृग. रे श्र. ह. मू. पू. उ. पा. इन नक्षत्रोंमें सीमंत कीजिये. और र. मं. गु. ये वार लीजिये. रिक्ता ४।९।१४ ये तिथि वर्जित है ॥४॥ और पुंसवनकर्मको १।२।३ मास और ६।१२।९।२।५।११।८ लग्न लीजे. मुख्य गर्भके मासमें पुंसवनकर्म, पूजा, दान, स्थिरता निमित्त कीजे. अरु सीमंत अष्टम ८ मासमें कीजे इति सीमंतपुसवने ॥ ५ ॥ जो त्रिकोण ५।९ केंद्र १।४।७।१० इनमें सौम्य और ३।६।११ इनमें पापग्रह हों तौ जो स्त्री प्रसग करै तौ संतान होवे परंतु रात्रिअध लग्न त्याज्य हैं इति गर्भाधानम् ॥ ६ ॥ पु पु. ह. चि. स्वा अनु ज्ये मृ. मू. उ. ष. ये नक्षत्र और ११।१२ ये दिन, बु चं र. गु. वार और-२।५।८।११ लग्नमें बालकको नाम धारिये ॥ इति नाम करणं. ॥ ७ ॥ ८ ॥

. ज्ये. मू. श्र. ध. रो. मृ. पु. पु. स्वा. ह. उषा, रे. म. ये नक्षत्र, सिंह कन्या, कुंभ ये लग्न, तीसरे चोथे में और यात्रा मुहूर्तमें कहे हुए तिथिवार पहिले कन्या पुत्रको बाहिर निकालना परंतु भौम शनिवारवर्जित हैं यह र्ते नक्षत्र दर्शकोभी लेना ॥ ९ ॥ १० ॥

पुनर्वसुद्वयंचित्राविशाखाभरणीद्वयम् ॥
मूलमार्द्रामघाहेयाश्रवणोदशमस्तथा ॥ ११ ॥
सोमशुक्रबुधानारीप्रसूतास्नानकर्मणि ॥
हेयाप्रतिपदापष्ठीनवमीचतिथिक्षयम् ॥ १२ ॥

अथ कालनिष्कासनयंत्र.

अनु.	ज्ये.	मू.	श्र.	ध.	रो.	मृ.
[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]

टीका --पुनर्वस्विति । पुनर्वसु, पुष्य, चित्रा, वि. कृ. मू. आ. म. श्र. ये नक्षत्र प्रसूतिस्नानको वर्जित. सोम, शुक्र बुध ये वार वर्जित और १।६।९।३।७ ये तिथि वर्जित हैं. उनमें प्रसूति स्नान न करिये ॥ ११॥ १२॥

हस्तादिपंचकेऽश्विन्यांधनिष्ठायांचरेवती ॥
गुरौशुक्रेबुधेवारेधार्यंस्त्रीभिर्नवांवरम् ॥ १३ ॥
लग्नेमीने च कन्यायांमिथुनंचवृषःशुभः ॥
पुष्पेपुनर्वसुद्वंद्वेरोहिण्युत्तरभेषुच ॥ १४ ॥

स्त्रीनववस्त्रधा. मुहू				पुरुषनववस्त्रधा. मुहूर्त.					
ह.	चि.	स्वा.	ह.	चि.	स्वा.	वि.	ऽनु	पु.	पु.
वि.	ऽनु	ज्ये.	अ	रो	उ. ३	ध	रे	मु.	मृ
ध.	ऽश्वि	रे.	शु	१२	६	३	२	४	१
बु.	शु.	बृ.	ति.	धि.	३	८	११	५	१०
पू.	१२ ६	३ २	१५	ये.	ति. धि. शु भ.				

टीका ह. चि. स्वा. वि. अनु. अश्वि. रे. ध. पु. रो. ऊ. तीनों उत्तरा गुरु, शुक्र, बुध ये वार, मीन, कन्या, मिथुन, वृष, ये लग्न स्त्रीको नवीन् वस्त्र धारणके लिये शुभ जानिये ॥१३॥ १४ ॥ इति नववस्त्रधारणम् ॥

रोहिण्युत्तररेवत्योर्मूलंस्वात्यनुराधयोः ॥
धनिष्ठाचत्रयःपूर्वाज्येष्ठायांमृगशीर्षके ॥ १५॥
एतेयत्रागताभानिप्रसूतिस्थानकोविदैः ॥

वारेभौमार्कयोर्जीवेस्नानमुक्तंसदैवहि ॥ १६ ॥
मूलादितिद्वयंग्राह्यंश्रवणश्चमृगःक्रूरः ॥
जलवाप्यचेनेहेयाःशुक्रमंदार्कभूमिजाः ॥ १७ ॥

टीका—अथ प्रसूति विशेषस्नान और प्रसूतिकूपजलादि पूजन मुहूर्त वर्णन करते हैं. रोहिणी, तीनों उत्तरा, रेवती, मूल, स्वाती, अनुराधा, धनिष्ठा, पूर्वात्रय, ज्येष्ठा, मृगशिर ये चौदह नक्षत्र लीजिये. और भौम, रवि, गुरु, ये वार प्रसूतिस्थानको [illegible]
य शुभ हैं ॥ १[illegible]
॥ १६ ॥ पुनः
तिस्नानमें मू. पु. पु.
श्र. मृ. इ. ये नक्षत्र

[illegible]

[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	
२	४	५	७	८	१०	११	१२
१३	१४	१५	०	ति.	य	य	०

ग्राह्य हैं. शुक्र, शनि, रवि, भौम ये वार त्यागिके प्रसूतिको कूपजलाशयपूजन उत्तम है ॥ १७ ॥

नवान्नभोजनेग्राह्यं वस्त्रे प्रोक्तमशेषतः ॥
वाराधिकौसूर्यसोमौनक्षत्रंश्रवणोमृगः ॥ १८ ॥

आद्यान्नप्राशनेपूर्वा सार्पार्द्रावरुणो यमः ॥
नक्षत्राणिपरित्यज्यवारेभौमार्कनंदने ॥ १९ ॥
द्वादशीसप्तमीरिक्तापर्वनंदास्तुवर्जिताः ॥
लग्नेषुचझपोग्राह्योवृषकन्याचमन्मथः ॥ २० ॥
शुक्लपक्षेशुभेयोगेसंग्राह्यः शुभचंद्रमाः ॥
मासेषष्ठाष्टमेपुंसां स्त्रियोमासिचपंचमे ॥ २१ ॥

टीका—बालकके नये अन्नका भोजन और नयावस्त्र धारणविषे शनि, रवि, ये वार वर्जित हैं. और श्रवण, मृगशिर, रवि, सोम, ये वस्त्रके मुहूर्तविषे नवान्न भोजनसे अधिक है ॥ १८ ॥ बालकके अन्नप्राशनके मुहूर्तविषे इतने नक्षत्र वर्जित हैं. तीनों पूर्वा, आश्लेषा, आर्द्रा, शतभिषा व भरणी और भौम, शनि ये वार १२। ७।४।९।१४।३०।१।६।११ये ॰॰, व्यतीपात योग ये सब वर्जित हैं और मीन,

अथ प्रथमान्नप्राशनमुहूर्तयन्त्रम्							
ऽश्वि	कृ	रो	मृ	पू	पु	म	उ
ह	चि	स्वा	वि	ऽनु	ज्ये	मू	उ
श्र	ध	उ	रे	न	सू	च	शु
शु	वृ	वार	२	३	५	१०	१३
ति	२	३	६	१२	ल	शु	म
या	च	द्व	पू	र	शुर	वस	६
■	मा	सा	स्त्रि	य	५	मा	स

मिथुन, कन्या, ये लग्न शुभ हैं. यह शुक्लपक्षविषे उत्तम योगमें कीजे और शुभ चंद्रमा होई. छठवां व आठवां पुत्रके अन्नप्राशनमें ग्राह्य है कन्याके पांचवें मासमें प्राशन कीजे ॥ १९ ॥ २० ॥ २१ ॥ इति नवान्न मुहूर्तः ॥

पुनर्वसुद्वयंज्येष्ठामृगश्वश्रवणद्वयं ॥
हस्तत्रयंचरेवत्यांशुक्लपक्षोत्तरायणे ॥ २२ ॥
लग्नंगोस्त्रीधनुः कुंभौमकरोमन्मथस्तथा ॥
सौम्येवारेशुभेयोगेचूडाकर्मस्मृतंबुधैः ॥ २३ ॥
हस्तत्रयेहरिद्वंद्वे पूर्वाश्वमृगपंचके ॥
मूलेपौष्णेचनक्षत्रे बुधेऽर्के गुरुशुक्रयोः ॥२४॥

टीका—पुनर्वस्विति । पु. पु. ज्ये. मृ. अ. ध. ह. चि. स्वा. रे. ये नक्षत्र और शुक्लपक्ष उत्तरायण ॥ २२ ॥ और वृ. क. कुं. ध. म. मि. ये लग्न; चंद्र, बुध, शुक्रवार ये सर्वोग हैं. जन्ममास और रिक्ता ये मुंडन और भूषण धारणमें

चूडाकर्ममुहूर्तयंत्र.

पु	पु.	ज्ये	मृ.	श्र.	ध.	ह.	०
चि.	स्वा	रे.	न.	शु	क्र.	प	क्ष
११	१२	१	२	३	रा.	दि.	च
बु	बृ.	शु	धा	२	६	९	१०
१०	३	ल.	म.	२	३	५	६
७	१०	१	१२	ति	थि	म.	दा
ध्य	ती	पा	त.	व.	ज्ये	है	०

वर्जित हैं ॥ २३ ॥ इति चूडाकर्म ॥ हस्तेति । ह. चि. स्वा. श्र. ध. पू. ३, मृ. आ. पु. पु. ऽश्ले. मृ. रे. ये नक्षत्र और रवि, बुध, गुरु, शुक्र, ये वार शुभ हैं ॥ २४ ॥

देवोत्थानेमीनचापेलग्नेवर्षेचपंचमे ॥
विद्यारंभोऽत्रवर्ज्यश्चपठनाध्यायरिक्तकाः॥२५॥

रिक्तायांचअमावस्यां प्रतिपच्चविवर्जयेत् ॥
बुधेंदुवासरेमूर्खःशनौभौमेमृतिप्रदः॥ २६ ॥

विद्यारंभे गुरुः श्रेष्ठो मध्यमौ भृगुभास्करौ ॥
बुधेंदुचोपविद्यायां शनिभौमौपरित्यजेत्॥२७॥

पूर्वाषाढाश्विनीहस्तत्रये च श्रवणत्रये ॥
ज्येष्ठाभगे मृगेपुष्यरेवत्यां चोत्तरायणे ॥ २८ ॥

द्वितीयायांतृतीयायांपंचम्यां दशमीत्रयम् ॥
सूर्यशुक्रसुराचार्यवारेपक्षेतथासिते ॥ २९ ॥
लग्नेवृषेधनुःसिंहेकन्यामिथुनयोरपि ॥
व्रतबंधःशुभेयोगेब्रह्मक्षत्रविशांपतेः ॥ ३० ॥
पापोभौमःशनिःकेतुःक्रूरोराहू रविस्तथा ॥
सौम्यःसोमोबुधश्चैवगुरुःशुक्रस्तथैवच ॥ ३१ ॥

